निशातः, त्रि, (नि + शो निशाने + क्तः । "शाच्छोरन्यतरस्याम् ।" ७ । ४ । ४१ । इति पक्षे इत्वाभावः ।) शाणितः । इति हेमचन्द्रः ॥

निशादः, पुं, (निशायां अत्तिभक्षयतीति । अद् + अच् ।) निषादः । इत्यमरटीकायां रमानाथः ॥ त्रि, निशासक् ॥

निशादिः, स्त्री, (निशाया आदिर्यत्र ।) सन्ध्या । इति राजनिर्घण्टः ॥

निशान्तं, क्ली, (निशाम्यते विश्रम्यतेऽस्मिन्निति । नि + शम + अधिकरणे क्तः ।) गृहम् । इत्यमरः । २ । २ । ५ ॥ (यथा, रघुः । १६ । ४० ।
"तस्याः स राजोपपदं निशान्तं
कामीव कान्ताहृदयं प्रविश्य ॥"
निशाया अन्तो यत्र ।) उषा । (यथा, मनुः । ४ । ९९ ।
"न निशान्ते परिश्रान्तो ब्रह्माधीत्य पुनः स्वपेत् ॥")
शान्ते, त्रि । इति मेदिनी । ते, ११८ ॥

निशान्धा, स्त्री, (निशायां अन्धयति उपसंहरति आत्मानमिति । अन्ध उपसंहारे + अच् + टाप् ।) जतुकालता । इति राजनिर्घण्टः ॥ (निशायां अन्धः ।) रात्र्यन्धे, त्रि ॥

निशापतिः, पुं, (निशायाः पतिः ।) चन्द्रः । (यथा, सूर्य्यसिद्धान्ते । २ । ४७ ।
"स्वमन्दभुक्तिसंशुद्धा मध्यभुक्तिर्निशापतेः ।
दोर्ज्यान्तरादिकं कृत्वा भुक्तावृणधनं भवेत् ॥")
कर्पूरः । इत्यमरः ॥ (निशायामेव पतिरिति विग्रहे क्वचित् व्यञ्जनावृत्त्या उपपतिरपि । यथा, आर्य्यासप्तशत्याम् । ३५२ ।
"प्राङ्गणकोणेऽपि निशापतिः स तापं सुधामयो हरति ।
यदि मां रजनिव्वर इव सखि ! स न निजबहिर्गेहपतिः ॥")

निशापुष्पं, क्ली, (निशायां रात्रौ पुष्प्यति विकसतीति । पुष्प विकासे + अच् ।) उत्पलम् । इति राजनिर्घण्टः ॥

निशाबलः, पुं, (निशायां रात्रौ बलं यस्य ।) मेषवृषमिथुनकर्कटधनुर्मकरराशयः । इति ज्योतिषम् ॥

निशाभङ्गा, स्त्री, (निशा हरिद्रा तद्वत् भङ्गो यस्याः ।) दुग्धपुच्छी । इति शब्दचन्द्रिका ॥ दुग्धफेया इति भाषा ॥

निशामणिः, पुं, (निशाया मणिरिव ।) चन्द्रः । इति त्रिकाण्डशेषः ॥

निशामनं, क्ली, (नि + शम + णिच् + ल्युट् ।) दर्शनम् । आलोचनम् । इति मेदिनी । ने, १६० ॥ श्रवणम् । इति हेमचन्द्रः । ३ । २४० ॥

निशाम्नगः, पुं, (निशाचरो म्नगः पशुः ।) शृगालः । इति शब्दरत्नावली ॥

निशारणं, क्ली, (नि + शृ हिंसे + णिच् + ल्युट् ।) मारणम् । इत्यमरः । २ । ८ । ११२ ॥ (निशाया रणम् ।) रात्रियुद्धम् ॥ (निशाया रवः शब्दः ।) रात्रशब्दे, पुं ॥

निशारत्नं, क्ली, (निशाया निशायां वा रत्नमिव ।) चन्द्रः । इति हेमचन्द्रः । २ । १९ ॥

निशारुकः, पुं, रूपकभेदः । यथा,—
"हठः प्रौढ़ोऽथ खम्बरो विभवस्तुरङ्गमः ।
निशारुकः प्रतितालः कथिताः सप्त रूपकाः ॥"
तस्य लक्षणं यथा,—
"लघुद्वन्द्वं गुरुद्वन्द्वं तत्रासतालकः स्मृतः ।
चतुर्विंशतिवर्णैस्तु रसे हास्ये निशारुकः ॥"
तालविशेषः । यथा,—
"प्रविश्य नर्त्तको रङ्गं विकीर्य्य कुसुमादिकम् ।
निशारुकेण तालेन कोमलं नृत्यमाचरेत् ॥"
इति सङ्गीतदामोदरः ॥

निशावनः, पुं, (निशावत् अन्धकारजनकं वनं यत्र ।) शणः । इति राजनिर्घण्टः ॥

निशाह्रस्वं, क्ली, (निशानां ह्रस्वं यस्मात् ।) रात्रिगमः । बहुनिशाः । इति शब्दरत्नावली ॥

निशावेदी, [न्] पुं, (निशां निशापरिमाणं वेत्ति वेदयति वा । विद् वा वेदि + णिनिः ।) कुक्कुटः । इति हेमचन्द्रः । ४ । ३९० ॥

निशाहसः, पुं, (निशायां रात्रौ हसो हासो विकाशो यस्य ।) कुमुदम् । इति त्रिकाण्डशेषः ॥

निशाह्वा, स्त्री, (निशाया आह्वा आख्या आह्वा यस्याः ।) हरिद्रा । इत्यमरः । २ । ९ । ४१ ॥

निशितं, क्ली, (नि + शो + क्तः । "शाच्छोरन्यतरस्याम् ।" ७ । ४ । ४१ । इति इत्वम् ।) लौहम् । इति राजनिर्घण्टः ॥

निशितः, त्रि, (नि + शो + क्तः ।) शाणितः । इत्यमरः । ३ । १ । ९१ ॥ (यथा, महाभारते । १ । १३४ । ६५ ।
"तद्वाणसमकालन्तु वीभत्सुर्निशितैः शरैः ।
अवार्य्यैः पञ्चभिर्भाङ्गं मत्स्यमभ्यताड़यत् ॥")

निशिपुष्पा, स्त्री, (निशि पुष्प्यति विकाशते इति । पुष्प + अच् । टाप् ।) शेफालिका । इति त्रिकाण्डशेषः ॥

निशिपुष्पिका, स्त्री, (निशिपुष्पा + स्वार्थे कन् ।) शेफालिका । इति शब्दरत्नावली ॥

निशिपुष्पी, स्त्री, शेफालिका । निशि रात्रौ विकसितं पुष्पमस्या इति बहुव्रीहौ मध्यपदलोपः सप्तम्या अलुक् च ततो जातेरत इति ङीप् ॥

निशीथः, (नितरां शेतेऽस्मिन्निति । नि + शी + "निशीथगोपीथावगथाः ।" उणा । २ । ९ । इति थक्प्रत्ययेन निपातनात् साधुः ।) अर्द्धरात्रः । इत्यमरः । १ । ४ । ६ ॥ (यथा, रघुः । ३ । १५ ।
"निशीथदीपाः सहसा हतत्विषो
बभूवुरालेख्यसमर्पिता इव ॥")
रात्रिमात्रम् । इति मेदिनी । थे, २० ॥ (यथा, ऋतुसंहारे । १ । ३ ।
"सुतन्त्रीगीतं मदनस्य दीपनं
शुचौ निशीथेऽनुभवन्ति कामिनः ॥")

निशीथिनी, स्त्री, (निशीथोऽस्त्यस्या इति । इनिः । ङीप् ।) रात्रिः । इत्यमरः । १ । ४ । ४ ॥

निशीथिनीनाथः, पुं, (निशीथिन्या नाथः ।) चन्द्रः । इति हलायुधः ॥

निशीथ्या, स्त्री, रात्रिः । इति भूरिप्रयोगः ॥

निशुम्भः, पुं, (नि + शुम्भ हिंसायाम् + भावे घञ् ।) वधः । इति हेमचन्द्रः । ३ । ३६३ ॥ दानवविशेषः । यथा,—
"कश्यपस्य दनुर्नाम भार्य्यासीद्द्विजसत्तम ।
तस्यास्तु द्वौ सुतावास्तां सहस्राच्चाहवाधिकौ ॥
ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरासुरः ।
तृतीयो नमुचिर्नाम महाबलसमन्वितः ॥"
इति वामनपुराणे ५२ अध्यायः ॥
(अयं हि भगवत्या निहतः । इति मार्कण्डेयपुराणम् ॥ अपरोऽसुरविशेषः । यदुक्तं मार्कण्डेये । ९१ । ३६—३७ ।
"वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे ।
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ ॥
नन्दगोपगृहे जाता यशोदागर्भसम्भवा ।
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥")

निशुम्भनं, क्ली, (नि + शुम्भ हिंसायाम् + भावे ल्युट् ।) मारणम् । इति हलायुधः ॥

निशुम्भमर्द्दिनी, स्त्री, (निशुम्भं मर्द्दयतीति । मृद् + णिनिः । ङीप् ।) दुर्गा । इति हेमचन्द्रः ॥

निशुम्भशुम्भमथनी, स्त्री, (निशुम्भं शुम्भञ्च मथ्नातीति । मन्थ विलोड़ने + ल्युः । नलोपः । ततो ङीप् ।) दुर्गा । यथा, देवीपुराणे ।
"निशुम्भशुम्भमथनी देवी वेदेषु गीयते ॥"

निशुम्भी, [न्] पुं, (निशुम्भो मोहनाशोऽस्त्यस्येति । इनिः ।) बुद्धविशेषः । तत्पर्य्यायः । हेरम्बः २ हेवकः ३ चक्रसम्बरः ४ हेवः ५ वज्रकपाली ६ शशिशेखरः ७ वज्रटीकः ८ । इति त्रिकाण्डशेषः ॥

निशेतः, पुं, (निशायामपि एतं ईषद्गमनं यस्य ।) बकः । इति त्रिकाण्डशेषः ॥

निश्चयः, पुं, (निश्चीयतेऽनेनेति । निर् + चि + "एरच् ।" ३ । ३ । ५६ । इति अच् ।) निःसंशयज्ञानम् । तत्पर्य्यायः । निर्णयः २ । इत्यमरः । १ । ५ । ३ ॥ निर्णयनम् निश्चयः ४ । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । १९ । ३५ ।
"देहोऽयं मम बन्धोऽयं न ममेति च मुक्तता ।
तथा धनं गृहं राज्यं न ममेति च निश्चयः ॥")
"तदभावा प्रकारा धीस्तत्प्रकारा तु निर्णयः ॥"
इति भाषापरिच्छेदः ॥
(अर्थालङ्कारविशेषः । तल्लक्षणादिकं यथा, साहित्यदर्पणे । १० । ५६ ।
"अन्यन्निषिध्य प्रकृतस्थापनं निश्चयः पुनः ॥"
उदाहरणं यथा,—
"वदनमिदं न सरोजं नयने नेन्दीवरे एते ।
इह सविधे मुग्धदृशो मधुकर ! न मुधा परिभ्राम्य ॥")

निश्चला, स्त्री, (निश्चलतीति । निर् + चल + अच् । टाप् ।) शालपर्णी । इति राजनिर्घण्टः ॥